ध्रुवम्। कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहम्। १॥ सूर्य-मण्डल सम्भूते वरुणालय सम्भवे। अमाबीजमयं देवि शुक्र शापाद्विमुच्यताम्। २॥ वेदानां प्रणवो बीजं ब्रह्मानन्दमयोयदि तेन सत्येन हे देवि ब्रह्महत्या व्यपोहतु। ३॥ इति वारत्रयं पठेत्। ॐ ब्रां ब्रीं ब्रूं ब्रैं ब्रौं ब्रं ब्रः ब्रह्मशाप विमोचितायै सुरादेव्यै नमः इति त्रिः। ॐ क्रां क्रीं क्रूं क्रैं क्रौं क्रं क्रः सुरा कृष्ण शाप मोचय २ अमृतं स्रावय २ स्वाहा। सां सीं सूं सैं सौं सं सः शुक्र सुरा शाप मोचय २ मोचिकायै तन्मङ्गलं कुरु २ स्वाहा। हंसः शुचि षड्व-सुरन्तरिक्ष सद्धोता वेदिषद तिथि दुरोणशत् नृषद्वरसदृत व्योमस-दब्जा गोजा ऋतजा अद्रिजा ऋतं वृहत् ३ तत्राष्टादशभुजा देवि कमानन्द भैरवं ध्यात्वा ऐं ह्रीं श्रीं हसौः हसक्षमलवरयूं आनन्द भैरवाय वौषट् ४ सहक्षमलवरयूं सुरादेव्यै वषट् ३ द्रव्य मध्ये अं आं १६ पूर्वे कं खं १६ दक्षिणे थं दं १६ वामे तन्मध्ये हं क्षां द्रव्य मध्ये ॐ ऐं ह्रीं श्रीं हसौः जूं सः अमृतं अमृतोद्भवे अमृत वर्षिणी अमृतं स्रावय २ जूं सः स्वाहा। पूर्वादितः ग्लूं गगन रत्नेभ्यो नमः। स्लूं स्वर्ग रत्नेभ्यो नमः। प्लूं पाताल रत्नेभ्यो नमः। न्लूं नागलोक रत्नेभ्यो नमः। म्लूं मर्त्यलोक रत्नेभ्यो नमः। इति पञ्चरत्नं सम्पूज्य कुलार्णवे अखण्डैकारसानन्दे करैः परशु धात्मनि स्वच्छन्दं स्फुरणान्मन्त्रं निद्यहि कुलरूपिणी त्वद्रूपेन कर स्पर्शं करोमि त्वत्स्वरूपिणी भूतापरामृताकाराामस्मिन्विस्फुरणां कुरु। ब्रह्माण्डरस संभूतमशेष कुलसम्भवम्। आपूरितं महापात्रं पीयूषरसमावह। ब्रह्माण्डोदरतीर्थेषु करैः स्पृष्टानिसेवते। तेकरै-

स्तीर्थ मावेहि तीर्थं देहि निशाकर। दिवाचेति दिवाकर इति ध्यात्वा मांसादि। तत्रादौ त्रिकोण मण्डलं विलिख्य तदुपरि मांसादिपात्रं संस्थाप्य यमिति संसोष्य रमिति संदह्य वमित्याप्लाव्य धेनु मुद्रया मृतीकृत्य तदुपरि मूलं दशधा जप्त्वा ऋच पठेत्। ॐ प्रतद्विष्णु सवते वीर्येण मृगो न भीमकुचरोगरिष्टः यस्योरुषुत्रिषु विक्रमणेष्वधि क्षयन्तु भुवनानि विश्वा इति मांसं शोधयेत्। त्र्यम्बकं यजामहे सुगन्धि पुष्टि वर्धनम्। उर्वारुक मिव वन्धनान्मृत्योर्मुक्षीय मामृतात्। इति मीन शोधनम्। ॐ तद्विष्णोः परमंपद ७ं सदा पश्यन्ति सूरयः दिवीव चक्षुराततम्। तद्विप्रासो विपन्यवो जाग्रवांसः समिधते विष्णोर्यत्परमं पदम्। इति मुद्रा शोधनम्। विष्णुर्योनिः कल्पयतु त्वष्टा रूपाणि विंशंतु आसिंचतु प्रजापातिर्धाता गर्भं दधातुते। गर्भं देहि सिनीवाली गर्भं देहि सरस्वति। गर्भंते आश्विनो देवा वदत्तां पुष्कर स्रजौ। इति कुण्डगोलादि शोधयेत्। हूमित्यवगुंठ्य तालत्रयेण दिशः संशोध्य तत्रदेवी मावाह्य अवगुंठ्यामृतीकृत्य योनिमुद्राः प्रदर्श्य कुण्डलिन्याः प्रयोगे नानेस्मृताममृतवृष्टि योनिमुद्रोल्लासि करेण तत्रानीय मूलान्ते ब्रह्माण्डखण्डेति मन्त्रेणाभिमन्त्र्य ऐं अमृते अमृतोद्भवेति मन्त्रेणाभिमन्त्र्य सौः तद्रूपेण करेति मन्त्रेणाभिमन्त्र्य सौः नमः इति सम्पूज्य शंख मुद्रां प्रदर्श्य षड़ङ्गेन शकलीकृत्य मत्स्य मुद्रया पात्रमाच्छाद्य तं पात्रं देवीरूपं भावयेत्। कलशविधिना श्रीपात्रयोगिनी पात्र स्थापनं कृत्वा घट समीपे गुरुपात्र शक्तिपात्र स्वपात्र योगिनीपात्र वीरपात्र भोग पात्रां वली-

पात्रं प्रोक्षणीपात्रं पूर्ववत् सामान्य विशेषार्घवत् संस्थाप्य ततश्च-वर्णयुतकारणेन तत्व मुद्रया श्रीपात्र बिन्दुं समुद्धृत्य स्वहृदि ४ हसक्षमलवरयूँ आनन्द भैरवं तर्पयामि नमः इति सन्तर्पयेत् त्रिधा ४ हसक्षमलवरयूँ सुरादेवीं तर्पयामि नमः इति त्रिःसन्तर्प्य स्वशिरसि गुरुपादुका मन्त्रेण गुरुपात्रामृतेन श्रीमच्छ्री अमुकानन्द नाथ श्रीपादुकां पूजयामि नमः तर्पयामि नमः इति त्रिः गुरुं सन्तर्प्य एवं परमगुरुं परमाचार्य गुरुं च तर्पयेत्। ततः सेश्वरां श्रीपात्र बिन्दुभिः स्वहृदिमूलं श्रीभुवनेश्वरी भगवतीं सपरिवारां सवाहनां समुद्रां तर्पयामि नमः इति त्रिः सन्तर्प्य प्रोक्षणीपात्रं श्रीपात्रं बिन्दुभिः सम्पूर्य तेनैवमूलं आत्मतत्त्वात्मने नमः मूलं विद्या तत्त्वात्मने नमः मूलं शिव तत्त्वात्मने नमः सर्वं तत्त्वात्मने नमः इति स्वात्मानं सम्प्रोक्ष्य पूजोपकरणानि संप्रोक्षयेत्। इति कलशस्थापन विधिः।

अथ श्रीभुवनेश्वरी देवीं ध्यात्वा पीठोपरि पीठपूजां कुर्यात्। तत्रादौ स्वबामे गुरुमन्त्रेण गुरुपूजां कुर्यात्। स्वदक्षे गं गणपतये नमः पीठपूजां कुर्यात्। यथा—ॐ मंडूकाधाराय नमः। कालाग्नि रुद्राय नमः। मूल प्रकृत्यै नमः। आधार शक्तये नमः। कूर्माय नमः। अनन्ताय नमः। पृथिव्यै नमः। सुधा समुद्राय नमः। मणि द्वीपाय नमः। चिन्तामणि गृहाय नमः। पारिजाताय नमः। तन्मूले रत्नवेदिकायै नमः। मणि पीठाय नमः। दिक्षु नानामुनि-गणेभ्यो नमः। नाना देवेभ्यो नमः। धर्माय नमः। ज्ञानाय नमः। वैराग्याय नमः। ऐश्वर्याय नमः। अधर्माय नमः।

अज्ञानाय नमः। अवैराग्याय नमः। अनैश्वर्याय नमः। शेषाय नमः। पद्माय नमः। प्रकृतिमय पत्रेभ्यो नमः। विकारमय केसरेभ्यो नमः। पञ्चाशद्वर्णभूषित कर्णिकायै नमः। वैश्वानर मण्डलाय नमः। सूर्य मण्डलाय नमः। सोम मण्डलाय नमः। सं सत्त्वाय नमः। रं रजसे नमः। तं तमसे नमः। आं आत्मने नमः। पं परमात्मने नमः। ह्रीं ज्ञानात्मने नमः। अष्ट पत्रेषु। ॐ जयायै नमः। ॐ विजयायै नमः। ॐ अजितायै नमः। ॐ पराजितायै नमः। ॐ नित्यायै नमः। ॐ विलासिन्यै नमः। ॐ दोग्ध्र्यै नमः। ॐ अघोरायै नमः। मध्ये ॐ मङ्गलायै नमः। ॐ अमित्यादि क्षान्तं ह्रीं सर्वशक्ति कमलासनाय नमः इति पीठ-पूजां विधाय श्रीचक्रोपरि मूलं पठित्वा तत्रदेवीमूर्तिं परिकल्प्य पुष्पाञ्जलिं गृहीत्वा वमिति वामनासापुटेन स्वहृदयान्तेजोरूपां स्वेष्ट देवतां तत्रानीय। ॐ देवेशिभक्तिसुलभे परिवार समन्विते। यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिराभव। इति पठित्वा तं कुसुमाञ्जलिं चक्रोपरिक्षिपेत्। मूलं श्रीमच्छ्री भगवति भुवनेश्वरि इहागच्छ २ मूलं भगवति भुवनेश्वरि इहसंतिष्ठ २ मूलं भगवति भुवनेश्वरि इहसन्निधेहि २ मूलं भगवति भुवनेश्वरि इहसन्निरुद्धा-भव २ मम सर्वोपचारसहितं पूजां गृह्ण २ स्वाहा इत्यावाहनादि मुद्राः प्रदर्श्य प्राणप्रतिष्ठां चक्रोपरि लेलिहान मुद्रया कुर्यात्। आं ह्रीं क्रौं यं रं लं वं शं षं सं हं लं क्षं हंसः सोहं श्रीभुवनेश्वरी प्राणाः इहप्राणाः ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं लं क्षं हंसः सोहं श्रीभुवनेश्वरी जीव इहस्थितः ॐ आं ह्रीं क्रौं यं रं लं शं षं

सं हं लं क्षं हंसः सोहं श्रीभुवनेश्वरी सर्वेन्द्रियाणि इहस्थितानि ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं लं क्षं हंसः सोहं श्रीभुवनेश्वरी वाङ्मनस्त्वक्चक्षुः श्रोत्रघ्राणप्राणाः इहागच्छन्तु सुखं चिरं-तिष्ठन्तु स्वाहा इति प्राणप्रतिष्ठां विधाय छोटिकाभिर्दशदिग्बन्धनं कृत्वा अवगुंठ्यामृतीकृत्य शकलीकृत्य परमीकृत्य धेनुयोनिमुद्राः प्रदर्श्य पाशाङ्कुश वराभयमुद्राः प्रदर्श्य पुनः श्रीपात्रामृतेन सायुधां सपरिवारां सवाहनां सावर्णां सेश्वरां श्रीमच्छ्री भुवनेश्वरी भगवतीं तर्पयामि नमः इति त्रिः सन्तर्प्य मूलं एतदासनं श्रीमदेश्वर सहितायै श्रीमच्छ्री भुवनेश्वरी भगवत्यै नमः। भगवत्यत्रासन उपविश्यतामित्यासन उपविष्टां भावयेत्। मूलं एतत्पाद्यं श्रीभुवनेश्वरसहितायै श्रीमच्छ्री भुवनेश्वरी भगवत्यै नमः। इति पाद्य-पात्रेण पादयोः पाद्यं दद्यात्। पुनर्मूलं एतदर्घ्यं श्रीमदीश्वर सहितायै श्रीमच्छ्री भुवनेश्वरी भगवत्यै स्वाहा। इत्यर्घ पात्रेण शिरसि अर्घ्यं दद्यात्। मूलं एतदाचमनीयं श्रीमदीश्वर सहितायै श्रीमच्छ्री भुवनेश्वरी भगवत्यै स्वाहा। इत्याचमनीय पात्रेण मुखे आचमनीयं दद्यात्। मूलं एतन्मधुपर्कं श्रीमदीश्वर सहितायै श्रीमच्छ्री भुवनेश्वरी भगवत्यै स्वाहा। इति मधुपर्कपात्रेण मुखे मधुपर्कं दद्यात्। मूलं एतदाचमनीयं श्रीमदीश्वर सहितायै श्रीमच्छ्री भुवनेश्वरी भगवत्यै स्वाहा। इति पुनराचमनीय पात्रेण मुखे आचमनीयं दद्यात्। ततः स्नान मण्डपं नीत्वा तत्र पीठोपरि संस्थाप्य तत्रासनादिभिः सम्पूज्य ततो गङ्गादि तीर्थोदकं संमिश्रित क्षीरादिभिर्मूलं एतत्स्नानीयं श्रीमदीश्वर सहितायै श्रीमच्छ्री भुवनेश्वरी

भगवत्यै नमः। इति सर्वाङ्गेषु स्नानीयं दद्यात् इति सुस्नाप्य शुद्धदुकूले नाङ्गं प्रोक्ष्य कालागुरुधूपेन केशान संशोष्यालङ्कार मण्डपं नीत्वा। तत्रविचित्रपट्टवस्त्रे कुंकुमकस्तूरी चन्दन सिन्दूर मुकुट कुण्डल हार त्रयादि नूपुरां मञ्जरि दर्पणादि नानालङ्कारान् दत्वा पुनराचमनीयं दद्यात्। ततः पूजामण्डपं समानीय तत्रपुनः पाद्यादिमधुपर्कान्तं सम्पूज्य मूलं मध्यमानाङ्गुष्ठाभ्यां श्रीमदीश्वर सहितायै श्रीमच्छ्री भुवनेश्वरी भगवत्यै एष गन्धो नमः इति तिलकं कुर्यात्। ततोऽङ्गुष्टतर्जनीभ्यां मूलं श्रीमदीश्वर सहितायै श्रीमच्छ्री भुवनेश्वरी भगवत्यै एतान्यक्षत पुष्पाणि बौषट् इति पुष्पैः सम्पूज्य ततोधूपपात्रं अस्त्राय फट्। इति सामान्यार्घोदकेन सम्प्रोक्ष्य पुरतः संस्थाप्य बामतर्जन्यां संस्पृशन् श्रीपत्रामृतेन धूपं निवेदयामिति निवेद्य ॐ जगध्वनि विश्वमातः स्वाहेति घण्टां सम्पूज्य बामेन पाणिना तां बादयन् मध्यानामांगुष्ठेर्धूपं घृत्वा ऐं हृल्लेखायै विद्महे ह्रीं भुवनायै धीमहि श्रीतन्नः शक्तिः प्रचोदयात् इति गायत्री मूलमन्त्रंच पठन् वनस्पति रसोत्पन्नो गन्धाढ्यो गन्ध संयुतः। आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यताम् इति त्रिविधो-त्तोल्य देवीं धूपयेत् ततोदीपं सन्मुखे संस्थाप्य पूर्ववत्प्रोक्षणेन पूजनं कृत्वा बाममध्य मयदीपपात्रं स्पृशन् दीपं निवेदयामिति श्रीपात्रा-मृतेन निवेद्य पूर्ववत् घण्टां बादयन् मध्यानामामध्ये दीपमंगुष्ठेन घृत्वा दर्शयेत् पूर्ववद्गायत्रीं च मूलं पठन्। सुप्रकाशो महादीपः सर्वतस्ति मिरापहः। सबाह्याभ्यन्तरे ज्योतिर्दीपोयं प्रतिगृह्यताम् इति दीपं दद्यात्। ततः स्वर्णादिपात्रे कुंकुमेन वसुपत्रं चन्द्ररूपं

चरुं कृत्वा मध्ये दीप मेकराष्ट पत्रेषु दीपाष्टकं संस्थाप्य मूलमन्त्रेण प्रज्वाल्य श्रीं सौः ग्लूं स्लूं प्लूं ज्लूं सौः श्रीरत्नेश्वर्यै नमः इत्यभ्यर्च्य मूलेन चाभ्यर्च्य स्थालकं मस्त कान्त मुद्धृत्य नववारं मूलं च पठित्वा गायत्रीं पठित्वा। समस्त चक्रचक्रेशीपूतेदेवि नवात्मिके। आरार्तिक मिदंदेवि गृहाण ममसिद्धये। इति चक्र मुद्रया नीराजयेत्। ततो नानानैवेद्यं स्वर्णादिपात्रे निक्षिप्य नमः इत्यभ्युक्ष्य हूं इत्यवगुंठ्य धेनुमुद्रयामृतीकृत्य मूलं सप्तधा जप्त्वा वामाङ्गुष्ठेन नैवेद्य पात्रं स्पृशन् मूलान्ते। हेमपात्रगतं दिव्यं परमान्नं सुसंस्कृतम्। पञ्चधा षट्रसोपेतं गृहाण परमेश्वरि। स्फारत्सौरभनिर्भरं रुचिकरं शाल्योदनं निर्मलं युक्तं हिंगुमरीचजीरसुरभिद्रव्यान्वितैर्व्यञ्जनैः। पक्वान्नेन सपायसेन मधुना दध्याज्य संमिश्रितं नैवेद्यं सुरसुन्दरी विरचितं श्रीसुन्दरी त्वत्प्रिये। ह्रां हृदयाय नमः। ह्रीं शिरसे स्वाहा। ह्रूं शिखायै वषट्। ह्रैं कवचाय हुम्। ह्रौं नेत्रत्रयाय वौषट्। ह्रः अस्त्राय फट्। ॐ हृल्लेखायै नमः। ऐं गगनायै नमः। ऊं रक्तायै नमः। ई करालिकायै नमः। औं महोच्छुष्मायै नमः। गं गङ्गायै नमः। यं यमुनायै नमः। सं सरस्वत्यै नमः। गायत्री सहित ब्रह्मणे नमः। सावित्री सहित विष्णवे नमः। पार्वती सहित रुद्राय नमः। लक्ष्मी सहित कुवेराय नमः। रति सहित मदनाय नमः। पुष्टि सहित विघ्नराजाय नमः। शङ्ख निधये नमः। पद्म निधये नमः। अनङ्ग कुसुमायै नमः। अनङ्ग कुसुमातुरायै नमः। अनङ्ग मदनायै नमः। अनङ्ग मदनातुरायै नमः। अनङ्ग मेखलायै नमः।

भुवनपालायै नमः। गगनवेगायै नमः। शशिरेखायै नमः। करालयै नमः। विकरालयै नमः। उमायै नमः। सरस्वत्यै नमः। श्रियै नमः। दुर्गायै नमः। लक्ष्म्यै नमः। सत्यै नमः। श्रुत्यै नमः। स्मृत्यै नमः। धृत्यै नमः। श्रद्धायै नमः। मेधायै नमः। मत्यैं नमः। रत्यै नमः। अनङ्ग रूपायै नमः। अनङ्ग मदनायै नमः। भुवनवेगायै नमः। भुवनपालिकायै नमः। सर्वशिशिरायै नमः। अनङ्गवेदनायै नमः। अनङ्गमेखलायै नमः। ब्रह्मादिभ्यो नमः। इन्द्राय नमः। अग्नये नमः। यमाय नमः। निऋृतये नमः। वरुणाय नमः। वायवे नमः। कुवेराय नमः। ईशानाय नमः। ब्रह्मणे नमः। अनन्ताय नमः। बज्राय नमः। शक्तये नमः। दण्डाय नमः। खड्गाय नमः। पाशाय नमः। ध्वजाय नमः। गदाय नमः। त्रिशूलाय नमः। पद्माय नमः। चक्राय नमः। पाशाय नमः। अङ्कुशाय नमः। वराय नमः। अभयाय नमः। बटुकाय नमः। योगिन्यै नमः। क्षेत्रपालाय नमः। गणेशाय नमः। मूलं श्रीमदीश्वर सहितायै सवाहनायै सायुधायै सपरिवारायै श्रीमच्छ्री भुवनेश्वरी भगवत्यै नैवेद्यं निवेदयामि इति दक्षानामांगुष्ठाभ्यामुत्सृजेत्। ततः मूलं एतदाचमनीयं श्रीमदीश्वर सहितायै श्रीमच्छ्री भुवनेश्वर्यै स्वधा इति दत्वा ग्रास मुद्राः प्रदर्शयेत्। यथा—ॐ प्राणाय स्वाहा दक्षाङ्गुष्ठ कनिष्ठानामाभिः। ॐ अपानाय स्वाहा दक्षाङ्गुष्ठ तर्जनी मध्यमाभिः। ॐ समानाय स्वाहा दक्षाङ्गुष्ठ मध्यमानामाभिः। ॐ उदानाय स्वाहा दक्षाङ्गुष्ठ तर्जनी मध्यमानामाभिः। ॐ व्यानाय स्वाहा।

सर्वाङ्गुलीभिः इति प्रदर्श्य पुनराचमनीयं दद्यात् मूलान्ते श्रीमदीश्वर सहितायै श्रीमच्छ्री भुवनेश्वरी भगवत्यै कर्पूरादि युक्तं ताम्बूलं निवेदयामि नमः इति दद्यात्। सर्वेषां अर्घपात्र जलेनोत्सर्गः कार्यम्। तत्रतत्त्वमुद्रया श्रीपात्रामृतेन मूलं श्रीमदीश्वर सहितायै सायुधां सपरिवारां सवाहनां सावरणां श्रीमच्छ्री भुवनेश्वरी भगवतीं तर्पयामि नमः इति त्रिः सन्तर्प्य पूर्वोक्तमुद्राः प्रदर्श्य योनिं हृदि क्षोभिणीं मुखे द्राविणीं भ्रूमध्ये आकर्षिणीं ललाटे वशिनीं ब्रह्मरन्ध्रे आह्लादिनीं पञ्चमुद्रामपि प्रदर्श्य कृताञ्जलिः श्रीमच्छ्री भुवनेश्वरी भगवतीं आवरणान्ते पूजयामि नमः इत्याज्ञां गृहीत्वा आवरण पूजामारभेत्। यथा—तत्रादौ देव्याः पृष्ठे त्रिकोणान्तराले रेखात्रयं विभाव्य गुरुपङ्क्तित्रयं पूजयेत्। यथा—ऐं दिव्यौघपराख्या गुरुपङ्क्ति पादुकां पूजयामि तर्पयामि नमः इति प्रथम रेखायां सम्पूज्य गुरुपात्र बिन्दुभिस्तर्पयेत्। ऐं सिद्धौघपरापराख्यगुरुपङ्क्ति श्रीपादुकां पूजयामि तर्पयामि नमः शक्तिऋषि श्रीपादुकां पूजयामि तर्पयामि नमः इति द्वितीय रेखायां अत्रैव गुरु परमगुरु परमेष्ठीगुरु परमाचार्यादीन् सम्पूज्य गुरुपात्राम्बुभिस्तर्पयेच्च इति त्रिः सकृद्वा सम्पूज्य मध्ये बिन्दौ श्रीदेवीं पूजयेत्। यथा—तत्रादौ कुसुमाञ्जलिं दत्वा पूजयेत्। मूलं श्रीमदीश्वर भैरवाङ्कोपविष्टां श्रीहृल्लेखा परमरूपिणीं श्रीमच्छ्री भुवनेश्वरी भगवतीं पूजयामि नमः इति सम्पूज्याष्टोत्तर शतवारं वैकवारं सन्तर्प्य च कुसुमाञ्जलिं गृहीत्वा अभी सिद्धिं मे देहि शरणागतवत्सले। भक्त्या समर्पयेतुभ्यं प्रथमावर्णाचनम् इति

कुसुमाञ्जलिं दत्वा योनि मुद्रया प्रणमेत्। इति बिन्दुचक्र पूजा प्रथमावरणम्।

अथ त्रिकोण पूजा। मूलं सर्वसिद्धि प्रदायक चक्राय नमः इत्यादौ कुसुमाञ्जलिनासम्पूजयेत्। यथा—अग्रे ऐं गगना श्रीपादुकां पूजयामि तर्पयामि नमः। दक्षिणे ऊं रक्ता श्रीपा० पू० त० न०। उत्तरे इं करालिका श्रीपा० पू० त०। पूर्वे श्रीदेवी श्रीपा० पू० त० न०। पश्चिमे अं महोच्छुष्मा श्रीपा० पू० त० न०। इति सम्पूज्य सन्तर्प्य गगनाग्रे मूलेन देवीं सम्पूज्य सन्तर्प्य कुसुमाञ्जलिं गृहीत्वा। अभीष्ट सिद्धिं मे देहि शरणागतवत्सले। भक्त्या समर्पयेतुभ्यं द्वितीया वरणार्चनम् इति कुसुमाञ्जलिं दत्वा योनि मुद्रया प्रणमेत्। इति द्वितीयावरण पूजा।

अथ षट्कोण पूजा। मूलं सर्वरोगहर चक्राय नमः इति प्रथमतः कुसुमाञ्जलिं दत्वा पूजयेत्। यथा—पूर्वे ॐ गायत्री सहित ब्रह्मा श्रीपा०। नैऋत्ये सावित्री सहित विष्णु श्रीपा०। वायव्ये ॐ सरस्वती सहित रुद्र श्रीपा०। अग्निकोणे श्री सहित धनपति श्रीपा०। पश्चिमे रति सहित स्मर श्रीपा०। ऐशान्यां पुष्टि सहित गणपति श्रीपा०। षट्कोणस्योभय पार्श्वयोः ॐ शंखनिधि श्रीपा०। पद्मनिधि श्री अत्रैव केसरेषु। अग्नौ ह्रां हृदयाय श्रीपा०। नैऋत्ये ह्रीं शिरः श्रीपा०। वायव्ये ह्रूं शिखा श्रीपा०। ऐशान्यां ह्रैं कवच श्रीपा०। मध्ये ह्रौं नेत्र श्रीपा०। दिक्षु ह्रः अस्त्र श्रीपा०। इति सम्पूज्य सन्तर्प्य गायत्र्यग्रे देवीं सम्पूज्य सन्तर्प्य कुसुमाञ्जलिं गृहीत्वा। अभीष्ट सिद्धिं मे देहि शरणागतवत्सले। भक्त्या

समर्पये तुभ्यं तृतीया वरणार्चनम् इति कुसुमाञ्जलिं दत्वा योनि मुद्रया प्रणमेत्। इति तृतीया वरणम्।

अथाष्टदल पूजा। मूलं सर्वसंक्षोभण चक्रायै नमः इति प्रथमतः कुसुमाञ्जलिं दत्वा पूजयेत्। तद्यथा—पूर्वादितः ॐ अनङ्ग कुसुमा श्रीपा०। ॐ अनङ्ग कुसुमातुरा श्रीपा०। ॐ अनङ्ग मदना श्रीपा०। ॐ अनङ्ग मदनातुरा श्रीपा०। ॐ भुवनपाला श्रीपा०। ॐ गगनवेगा श्रीपा०। ॐ शशिरेखा श्रीपा०। ॐ गगनरेखा श्रीपा०। इति सम्पूज्य सन्तर्प्य अनङ्ग कुसुमाग्रे मूलेन देवीं सम्पूज्य सन्तर्प्य कुसुमाञ्जलिं गृहीत्वा। अभीष्ट सिद्धिं मे देहि शरणागतवत्सले। भक्त्या समर्पये तुभ्यं चतुर्थावरणार्चनम्। इति चतुर्थावरणम्।

अथ षोड़षदल पूजा। मूलं सर्वाशापूरक चक्रायै नमः इति प्रथमतः कुसुमाञ्जलिनासम्पूज्य। तद्यथा—ॐ कराली श्रीपा०। ॐ विकराली श्रीपा०। ॐ उमा श्रीपा०। ॐ सरस्वती श्रीपा०। ॐ श्री श्रीपा०। ॐ श्रीदुर्गा श्रीपा०। ॐ उषा श्रीपा०। ॐ लक्ष्मी श्रीपा०। ॐ श्रुति श्रीपा०। ॐ स्मृति श्रीपा०। ॐ धृति श्रीपा०। ॐ श्रद्धा श्रीपा०। ॐ मेधा श्रीपा०। ॐ मति श्रीपा०। ॐ कान्ति श्रीपा०। ॐ आर्या श्रीपा०। तद्बहिर्वृत्तमध्ये दल सन्धिषु। अं ब्राह्मी श्रीपा०। ईं माहेश्वरी श्रीपा०। ऊं कौमारी श्रीपा०। ॠं वैष्णवी श्रीपा०। ॡं वाराही श्रीपा०। ऐं इन्द्राणी श्रीपा०। औं चामुण्डा श्रीपा०। अः महालक्ष्मी श्रीपा०। तद्बहिः पूर्वादितः। ॐ अनङ्गरूपा श्रीपा०। ॐ अनङ्गमदना श्रीपा०।

ॐ अनङ्गमदनातुरा श्रीपा०। ॐ भुवनवेगा श्रीपा०। ॐ अनङ्ग मदना श्रीपा०। ॐ अनङ्ग मदनातुरा श्रीपा०। ॐ भुवनवेगा श्रीपा०। ॐ भुवनपाला श्रीपा०। ॐ सर्वशिशिरा श्रीपा०। ॐ अनङ्गवेदना श्रीपा०। ॐ अनङ्गमेखला श्रीपा०। इति सम्पूज्य सन्तर्प्य करालयग्रे मूलेन देवीं सम्पूज्य सन्तर्प्य कुसुमाञ्जलिं गृहीत्वा। अभीष्ट सिद्धिं मे देहि पञ्चमावरणार्चनम् इति कुसुमाञ्जलि दत्वा योनि मुद्रया प्रणमेत्। इति पञ्चमावरणम्।

अथ चतुर्द्वार पूजा। मूलं त्रैलोक्य मोहन चक्राय नमः इति कुसुमाञ्जलिनासम्पूज्य पूर्वादितः पूजयेद्यथा। ॐ लां इन्द्र श्रीपा०। ॐ रं अग्नि श्रीपा०। ॐ यम श्रीपा०। ॐ क्षां निऋृति श्रीपा०। ॐ वं वरुण श्रीपा०। ॐ वं वायु श्रीपा०। ॐ सं सोम श्रीपा०। ॐ हं ईशान श्रीपा०। ईशान पूर्वयोर्मध्ये ॐ आं ब्रह्मा श्रीपा०। निऋृतिवरुणयोर्मध्ये ॐ ह्रीं अनन्त श्रीपा०। इति सम्पूज्य सन्तर्प्य तद्बहिर्वज्रादीन पूजयेत्। तद्यथा—ॐ बज्र श्रीपा०। ॐ शक्ति श्रीपा०। ॐ दण्ड श्रीपा०। ॐ खड्ग श्रीपा०। ॐ पाश श्रीपा०। ॐ ध्वज श्रीपा०। ॐ गदा श्रीपा०। ॐ त्रिशूल श्रीपा०। ॐ पद्म श्रीपा०। ॐ चक्र श्रीपा०। इति सम्पूज्य सन्तर्प्य वरुणाग्रे देवीं मूलेन सम्पूज्य सन्तर्प्य कुसुमाञ्जलिं गृहीत्वा। अभीष्ट सिद्धिं० षष्ठमावरणाचनम् इति कुसुमाञ्जलिं दत्वा योनि मुद्रया प्रणमेत्। इति षष्ठमावरण पूजा।

इत्थं पुनश्चतुर्द्वारमारभ्य बिन्द्वन्तं सम्पूजयेत्। ततः पुनर्बिन्दौ मूलं श्रीमदीश्वर भैरवाङ्कोपविष्टां सबाहनां सपरिवारां सावरणां

श्रीमच्छ्री भुवनेश्वरी भगवतीं पूजयामि नमः तर्पयामि नमः इति पाद्यादिभिः सम्पूज्य सन्तर्पयेत्। ततो देवी बाम हस्तोर्ध्वे ॐ पाश श्रीपा०। दक्ष हस्तोर्ध्वे ॐ अं अङ्कुश श्रीपा०। बाम हस्ताधः वं वर श्रीपा०। दक्ष हस्ताधः ॐ अं अभय श्रीपा०। इति सम्पूज्य सन्तर्पयेत्। ततः पुनश्चतुस्त्रे पश्चिमे वां बटुकाय श्रीपा०। उत्तरे यां योगिनी श्रीपा०। पूर्वे क्षां क्षेत्रपाल श्रीपा०। दक्षिणे गं गणेश श्रीपा०। इति सम्पूज्य सन्तर्पयेत् पुनर्बिन्दौ पूर्ववन्मूलं देवीं सम्पूज्य सन्तर्प्य योनि मुद्रां प्रदर्श्य प्रणम्य पुनर्मूलं पठन पुष्पाञ्जलि त्रयेण सम्पूज्य नित्यहोमगार भेद्यथा। तत्र कुण्ड त्रिकोण चतुरस्त्रं विभाव्य क्रिया शक्त्यात्मनं कुण्डाय नमः इति कुण्डं सम्पूज्य तत्राग्नि मानीय स्वचैतन्यानलं तस्मिन् संयोज्य रं अग्नये नमः इति सम्पूज्य नैऋतेपात्रं सजलं पुष्पत्रितय सहितं मूलेन मन्त्रितं संस्थाप्य अस्त्राय फडिति सामान्यार्घ्यवत्सम्पूज्य ॐ फट् क्रव्या दं सं निष्कर्षयामि फट् इति दर्भकाण्ड द्वयं प्रज्वाल्य बहिःक्षिपेत् इति क्रव्यादादि शुद्धिं कृत्वा सामान्य जलेन ॐ फट् ॐ अग्निं परिसमूहामि फट् अग्निं पर्युक्ष्मामि फट् फट् अग्निं परिषिंचामि फट् इति सम्प्रोक्ष्य फट् यज्ञस्य संततिरसि यज्ञस्य त्वा संतत्यै स्तृणामि फट् इति पूर्ववत्त्रयं दक्षिणेपश्च उत्तरेपश्च पश्चिमे- त्रयः दर्भानास्तीर्य रं अग्नये नमः इति पुनर्गन्धादिना सम्पूज्य आज्यपात्र मानीयाग्न्युपरि संस्थाप्य स्वमन्त्रेण सम्पूज्याज्यवीक्षणं कुर्याद्यथा। ॐ आज्यं तेजः समुद्दिष्टमाज्यं पापहरं परम् आज्यं सुराणा माहारः आज्ये लोकाः प्रतिष्ठिताः। दिव्यान्तरिक्ष भौमा-

चौर्यत्ते किल्विषमागतम्। तत्सर्वमाज्यस्पर्शेन विनाशमुपगच्छतु। आत्मनो वाङ्मनः कायोपार्जित पाप निवारणार्थं श्रीभुवनेश्वरी प्रीत्यर्थं इदमाज्यं समर्पयामि नमः इत्याज्यं वीक्ष्य मूलेन चरु आदिकं संमन्त्र्य पूर्णांदद्यात्। मूलं पठन् स्रुचं घृतपूर्णांकृत्वा स्वदेवताध्यानं पठन पूर्णाहुतिं दद्यात् ततोग्नौ देवता मावाह्य पाद्या-दिभिः सम्पूज्य बामकरेण मालां गृहीत्वा दक्षकरेणस्रुचं गृहीत्वा यथाशक्ति मनु होमं कृत्वा षड़ङ्गा हुतिर्जुहुयात्। यथा—ॐ ह्रां हृदयाय नमः स्वाहा। ॐ ह्रीं शिरसे नमः स्वाहा। ॐ ह्रूं शिखायै वषट् स्वाहा। ॐ ह्रैं कवचाय हुंम् स्वाहा। ॐ ह्रौं नेत्रत्रयाय बौषट् स्वाहा। ॐ ह्रः अस्त्राय फट् स्वाहा। इति हुत्वा प्राणाय स्वाहा। अपानाय स्वाहा। समानाय स्वाहा। उदा-नाय स्वाहा। व्यानाय स्वाहा। ॐ भूः स्वाहा। ॐ भुवः स्वाहा। ॐ स्वः स्वाहा। ॐ महः स्वाहा। ॐ जनः स्वाहा। ॐ तपः स्वाहा। ॐ सत्यं स्वा। इति हुत्वा आवरणदेवता होमं कुर्यात्। यथा—तत्रादौ गुरवः। ॐ दिव्यौघपराख्यागुरपंत्यै स्वाहा। ॐ सिद्धौघपराख्या गुरुपंत्यै स्वाहा। शक्ति ऋषये नमः स्वाहा। ऐं मानवौघपराख्या गुरुपंत्यै स्वाहा। इति हुत्वा स्वगुरुपरमगुरु परमाचार्यादिगुरूणां पृथक् पृथगाहुतिं दद्यात्।

अथावरण देवताः। ऐं गगनायै स्वाहा। उं रक्तायै स्वाहा। इं करालिकायै स्वाहा। अं महोच्छुष्मायै स्वाहा। गायत्री सहित ब्रह्मणे स्वाहा। सावित्री सहित विष्णवे स्वाहा। पार्वती सहित रुद्राय स्वाहा। श्री सहित धनपतये स्वाहा। रति सहित स्मराय

स्वाहा। पुष्टि सहित गणपतये स्वाहा। ह्रां हृदयाय स्वाहा।
ह्रीं शिरसे स्वाहा। ह्रूं शिखायै वषट् स्वाहा। ह्रैं चवचाय हुंम्
स्वाहा। ह्रौं नेत्रत्रयाय बौषट् स्वाहा। ह्रः अस्त्राय फट् स्वाहा।
अनङ्ग मदनातुरायै स्वाहा। उं रक्तायै स्वाहा। भुवनपालायै
स्वाहा। गगनवेगायै स्वाहा। शशिरेखायै स्वाहा। गगनरेखायै
स्वाहा। करालयै स्वाहा। विकरालयै स्वाहा। उमायै स्वाहा।
सरस्वत्यै स्वाहा। श्रियै स्वाहा। दुर्गायै स्वाहा। उरवायै
लक्ष्म्यै स्वाहा। श्रत्यै स्वाहा। स्मृत्यै स्वाहा। धृत्यै स्वाहा।
श्रद्धायै स्वाहा। मेधायै स्वाहा। मत्यैं स्वाहा। कान्त्यै स्वाहा।
आचार्यैं स्वाहा। अनङ्ग रूपायै स्वाहा। अनङ्ग मदनायै स्वाहा।
अनङ्ग मदनातुरायै स्वाहा। भुवनवेगायै स्वाहा। भुवनपालिकायै
स्वाहा। सर्वशिशिरायै स्वाहा। अनङ्ग वेदनायै स्वाहा। अनङ्ग
मेखलायै स्वाहा। लं इन्द्राय स्वाहा। रं अग्नये स्वाहा। यं
यमाय स्वाहा। क्षं निऋृतये स्वाहा। वं वरुणाय स्वाहा। षं
वायवे स्वाहा। सं सोमाय स्वाहा। हं ईशानाय स्वाहा। आं
ब्राह्मणे स्वाहा। ह्रीं अनन्ताय स्वाहा। बज्राय स्वाहा। शक्तये
स्वाहा। दण्डाय स्वाहा। खड्गाय स्वाहा। पाशाय स्वाहा।
ध्वजायै स्वाहा। गदायै स्वाहा। त्रिशूलाय स्वाहा। पद्माय
स्वाहा। चक्राय स्वाहा। मूलं श्रीमदीश्वराङ्कोप विष्टायै सायु-
धायै सवाहनायै समुद्रायै सपरिवारायै श्रीमच्छ्री भुवनेश्वरी भग-
वत्यै स्वाहा इति शतवारंहुत्वा पूर्णाहुतिं दद्यात्। तद्यथा—मूलं
ध्यानस्म न्यूनातिरिक्तं ······ मिरस्तु बौषट् स्वाहा इति पूर्णांदत्वा।

गुह्यातिगुह्यगोप्त्रित्वं गृहाणास्मत्कृतं जपम्। सिद्धिर्भवतु मेदेवि त्वत्प्रसादान्महेश्वरि। इत्यर्पणं विधाय अग्निरितिभस्म वायुरितिभस्म जलमिति स्थलमितिभस्म आशा इति भस्म। शिवमस्तु यजमानस्य छिद्रं मां भूत्कदाचन। देवदेव्याः प्रसादेन रक्षरक्षातु माभृशम्। इति पठेत् ललाटे भस्म तिलकं कुर्यात्। ततो देवतां विसृज्य फट् अग्नि विमुंचामि फट् इत्यग्नि विमुंच्य। क्षमस्व मन्त्र नाथाय नित्यानन्द मयायच। धर्मार्थ काम मोक्षाय पुनरागमनायच इत्याग्नौ पुष्पं दत्वा योनि मुद्रया ब्रह्माग्नि स्वात्माग्नौ संयोज्य प्रणमेत्। इति नित्य होम विधिः।

अत्र बटुकादि बलिः। तत्रादौ ईशाने मण्डलं कृत्वा तत्र पात्रं संस्थाप्य वां बटुकाय नमः इति बटुक पात्रं सम्पूज्य ह्रीं श्रीं एह्येहि देवी पुत्र बटुकनाथ कपिल जटाभारभास्वरत्रिनेत्र ज्वालामुख सर्वविघ्नान्नाशय २ मम सर्वोपचार सहितं बलिं गृह्ण गृह्ण स्वाहा इति वामाङ्गुष्ठानामिकाभ्यां बटुक बलिं दद्यात्। ततः आग्नेये योगिनीपात्रं संस्थाप्य यां योगिनीभ्यो नमः इति सम्पूज्य। ऊर्ध्वं ब्रह्माण्डतोवादिविगगनतलेभूतले निष्कले वा पाताले चानले वा सलिल पवनयोर्यत्र कुत्र स्थितावा। क्षेत्रे पीठोपपीठा दिषुच कृतपदा धूपदीपादिकेन प्रीतादेव्यः सदानः शुभ बलि विधिना पातु वीरेन्द्रवन्द्याः ॥१॥ यां योगितीभ्यः स्वाहा। सर्वयोगिनीभ्यो हुं फट् स्वाहा इति वामांगुष्ठ मध्यमाभ्यां योगिनी बलिं दद्यात्। ततः नैरृत्ये क्षेत्रपामपात्रं संस्थाप्य क्षां क्षेत्रपालाय नमः इति सम्पूज्य क्षां क्षीं क्षूं क्षैं क्षौं: क्षेत्रपाल अग्निबलिसहितं बलिं गृह्ण २

स्वाहा। योस्मिन्क्षेत्रे निवासीच क्षेत्रपालः सकिंकरः। सुप्रीतो बलिदानेन ममरक्षां करोतुसः इति बामांगुष्ठ तर्जनीभ्यां क्षेत्रपालाय बलिं दद्यात्। ततो वायव्ये गणपतिपात्रं संस्थाप्य गं गणपतये नमः इति सम्पूज्य गां गीं गूं गैं गौं गः गणपतये वरवरद सर्वजनं मे वश मानय बलिं गृह्ण २ स्वाहा इति बामांगुष्ठ मध्यमाभ्यां गणपति बलिं दद्यात्। ततः उत्तरे सर्वभूतपात्रं संस्थाप्य सर्वेभ्यो भूतेभ्यो नमः इति सम्पूज्य ह्रीं सर्वविघ्नकृद्भ्य सर्वभूतेभ्यो हूं स्वाहा सर्वभूतेभ्यः एष बलिर्नमः इति बामहस्त सर्वाभिरंगुलिभिः सर्वभूत बलिं दद्यात्। इति बटुकादि बलिः।

अस्मिन्नेवावसरेछागादि बलिं दद्यात्। तद्यथा—तत्रादौ पशु-मूलेनानीय पाद्यादिगन्धस्रगादिभिरलं कृत्य देव्यग्रे संस्थाप्य मूलेन प्रोक्षणीजलेन सम्प्रोक्ष्य अस्त्राय फट्‌इति संरक्ष्य हूमित्यवगुंठ्य धेनु मुद्रया मृतीकृत्य ऐं ह्रीं श्रीं सर्वदेवतारूपिणे बलिरूपायामुक पशवे नमः इति गन्धादिना त्रिः सम्पूज्य तस्य दक्षकर्णे पशुपाशाय विद्महे विप्रकर्णाय धीमहि तन्नो जीव प्रचोदयात् इति पशु गायत्रीं त्रिः पठित्वा पुरतः खड्गं निधाय ॐ किलकिल बज्रेश्वरी लोह-दण्डायै नमः इति गन्धादिना त्रिरभ्यर्च्य तस्य मुष्टौ वागीश्वरी ब्रह्माभ्यां नमः। मध्ये लक्ष्मीनारायणाभ्यां नमः। अग्रे उमा-महेश्वराभ्यां नमः इति सम्पूज्य तं धृत्वा मन्त्रं पठेत्। खड्गाया सुरनाशाय देवकार्यार्थ तत्पर। पशुछेद त्वया शीघ्रं खड्गनाथ नमोऽस्तुते इत्याभि मन्त्र्य गन्धाक्षत जलादिकमादाय मूलं अमुक मासेत्यादि अमुकगोत्रोऽमुक शर्मा अमुक कामः श्रीभुवनेश्वरि

इमं पशुं तुभ्यं समर्पयामि अहं प्रसीद इति पठित्वा पशोः शिरसि निक्षिप्य तच्छिरोधृत्वा। यज्ञार्थं पशवः सृष्टाः यज्ञार्थं पशुघातनम्। अतस्त्वां घातयिष्यामि तस्माद्यज्ञे बधोबधः। शिवाय तुभ्य मिदं पिण्डं सतस्त्वं शिवतां गतः उद्बुध्यस्व पशो त्वं हि नाशिवस्त्वं शिवोऽसिहि इति बोधयित्वा खड्गमादाय सौः अस्त्राय फट् छिन्धि छिन्धि स्वाहा इति स्कन्धं तस्य स्कन्धं योजयेत्। ततः स्वयं देवीरूपो भूत्वा निर्विकल्प एकेन प्रहारेण छिन्द्यात्। सविकल्पक परहस्तेन छेदयेत् अत्रैव ब्रह्मणा तिक्तैः पश्चादिति बलिं दद्यात्। इति बलिप्रदान विधिः।

ततो गुरुदिवौघान् ध्यायन प्राणायाम ऋष्यादि करषड्ङ्गध्यानं कृत्वा मन्त्रसंस्कारं कुर्यात्। ह्रौं ह्रौं ह्रौं इति त्रिः पठेत्। इति संजीवनम्।

अथोत्कीलनम्। नमः ह्रौं इत्युत्कीलनं त्रिः जपेत्।

अथ शापहरि विद्या। ह्रीं भैरवशापं मोचय २ ह्रीं इति शापहरो दशवारं जपेत् इति मन्त्रसंस्कारं कृत्वा ईश्वरमन्त्रं दशवारं जप्त्वा बाम हस्ते पात्रे वा मालां संस्थाप्य। ॐ मालेमाले महामाले सर्वसत्त्व स्वरूपिणी। चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदाभव इति मालां मूलेनापि सम्पूज्य गं अविघ्नं कुरु २ माले त्वं इति दक्षकरे गृहीत्वा यथा शक्ति जपं विधाय जपान्ते। त्वं माले सर्वदेवानां प्रीतिदा शुभदा तथा। शुभं कुरुष्य मेदेवि यशो वीर्यं ददस्वमे इति पठन् मालां शिरसि संस्थाप्य पुनरपि प्राणायाम

ऋष्यादि करषड़ङ्ग न्यासान् विधाय नमः ह्रं इति सम्पुट मन्त्रं जप्त्वा। गुह्यातिगुह्य गोप्त्रि त्वं० इत्यनेन तेजोमयं जपफलं देवी बामहस्ते समर्प्य कवच सहस्र नाम स्तोत्रादि पठित्वा गुरुस्तोत्रं पठेत्। सर्वमङ्गल माङ्गल्ये शिवे सर्वार्थ साधिके। शरण्ये त्र्यम्बिकेगौरि नारायणि नमोऽस्तुते। इति चतुर्वारं प्रदक्षिणीकृत्य। अपराधो भवत्येव सेवकस्य पदे पदे। कोपरः सहते लोके केवलं स्वामिनं बिना। इत्यष्टाङ्गं प्रणिपत्य ततः सामान्यार्घोदके चुलुकोदकेन गृहीत्वा ॐ इतः पूर्वं प्राणबुद्धि देहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसावाचा कर्मणा उदरेण शिश्न्या यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं सामदीयं सकलं श्रीभुवनेश्वरी भगवति चरण कमले समर्पण मस्तु। ॐ तत्सत् इति सामान्यार्घ्योदकं समर्प्य अञ्जलिं बद्ध्वा। यद्दत्तं भक्ति मार्गेण पुष्पं पत्रं फलं जलम्। निवेदितं च नैवेद्यं तद्गृहाणानुकम्पया ॥१॥ आवाहनं न जानामि न जानामि विसर्जनम्। पूजाभागं न जानामि क्षम्य तां परमेश्वरि। देवी दात्री च भोक्त्री च देवी सर्वमिदं जगत्। देवी जयतु सर्वत्र या देवी सोह मेवहि। यदक्षरपदं भ्रष्टं मात्रहीनं च यद्गतम्। तत्सर्वं कृपयादेवि गृहाणाराधनं मम प्रातः प्रभृति सायान्तं सायादि प्रातरन्ततः। यत्करोमि जगद्योने वदस्तु तव पूजनम्। क्षमस्व देवदेवेशि भुवनेशि महेश्वरि। तव पादाम्बुजे नित्यं निश्चला भक्तिरस्तु मे। इति देवीं पुष्पाञ्जलिना क्षमाप्य ततः शंख मुत्थाप्य साधुवासाधुवा कर्म यद्यदा चरितं मया। तत्सर्वं कृपयादेवि गृहाणाराधनं मम। इति शंखं

त्रिः भ्राम्य तज्जलं देवी दक्षहस्ते समर्प्य पुनस्तज्जलं बामहस्ते गृहीत्वा शंखं स्वस्थाने स्थाप्य तज्जलं मन्त्रेण संमंत्र्य तेन जलेन सप्तधा मूलं पठन् स्वशरीरं प्रोक्षयेत् ततः पुष्पाञ्जलिं गृहीत्वा। गच्छ २ परंस्थानं स्वस्थानं परमेश्वरि। यत्र ब्रह्मादयो देवा न विदुः परमं पदम् इति देवीं विसृज्य संहार मुद्रया निर्माल्य पुष्पमाघ्राय। तिष्ठ तिष्ठ परं स्थाने स्वस्थानं परमेश्वरि। यत्र ब्रह्मादयः सर्वे सुरास्तिष्ठन्ति मे हृदि। इति श्रीचक्रा तेजो रूपां देवीं मनसोत्थाप्य स्वहृदि संस्थापयेत्। ततश्चण्डेश्वराय नमः इति निर्माल्यं सम्पूज्य ईशानकोणे त्रित्रिकोणं संलिख्य तत्र ॐ ह्रीं उच्छिष्ट चाण्डालिनि सर्वसत्त्ववशङ्करी स्वाहा इति उच्छिष्ट चाण्डालिनीं निर्माल्येन सम्पूज्य लेह्यचोष्यान्नपानादि ताम्बूलं स्रग्विलेपनम्। निर्माल्य भोजनं तुभ्यं ददामि श्रीशिवाज्ञया इति नैवेद्यं शतांशतस्यैदत्वा विसृजेत् ततः श्रीपात्र मुत्थाप्य गुरुमन्त्रं स्मरेन् शिरसि संस्थाप्य तज्जलं किञ्चित्पात्रान्तरे संस्थाप्य तेन अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः मूलं आत्मतत्त्वं शोधयामि स्वाहा। कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं मूलं विद्या तत्त्वं शोधयामि स्वाहा। यं रं लं वं शं षं सं हं ळं क्षं त्रां ज्ञं मूलं शिवतत्त्वं शोधयामि स्वाहा। अमित्या दिक्षान्तं उच्चार्य मूलं सर्वतत्त्वं शोधयामि स्वाहा। इति चुलुक चतुष्टयं स्वीकुर्यात्। ततो गुरुपात्र मुत्तोल्य श्रीगुरु मन्त्रं पठन् गुरुसद्भावे गुरवेदद्यात्। गुरोरभावे स्वशिरसि गुरु पादुका स्थाने निक्षिपेत् अथवा गुरुज्येष्ठ पुत्राय दद्यात् ततः शक्तिपात्र मुत्तोल्य। अलि-

पात्र मिदं तुभ्यं दत्तं सयिशितं मया। स्वीकृत्य शुभगे देवि यशो-विद्यां च देहिमे। इति पठन् शक्तये दद्यात् ततो वीरपात्रामृतं वीरेभ्यो दद्यात् ततः स्वपात्रं कपालिनी मुद्रितेन बामकरेण गृहीत्वा स्वगुरुमार्गेण सामयिकैः सहपात्र बन्दनं कुर्यात्। तद्यथाः—ॐ श्रीमद्भैरव शेखर प्रविलचन्द्रामृत प्लावितं क्षेत्राधीश्वर योगिनीगण महासिद्धैः समाराधितं। आनन्दागमकं महात्म कमिदं साक्षात्त्रि खण्डामृतं वन्दे श्री प्रथमं कराम्बुजगतं पात्रं विशुद्धि प्रदम् इत्यभि वन्द्य वन्दनं कृत्वा जुहोमिति गुरुशक्ति साधकेभ्यः आज्ञां गृह्णीयात् ते च यथोचितं जुषस्व तिब्रूयः ततो मूलाधारात्कुल कुण्डलिनी मिष्ट देवता स्वरूपा मा जिह्वान्तं विभाव्य ॐ आत्मतत्त्वं शोधयामि स्वाहा इति कुलकुण्डे कुण्डलिनीं जुहुयात्॥१॥ ॐ हैमं सिन्धु रसावहं दयितया दत्तं च पीयादिभिः किञ्चिचञ्चलरक्त पङ्कजदृशा सानन्द मुद्वीक्षितं। बामे स्वादु विशुद्धि शुद्धि कवलं पाणौ विधायात्मके बन्देपात्र महं द्वितीय मधुना नन्दैक संवर्द्धनम् २ विद्यातत्वं शोधयामि स्वाहा॥२॥ ॐ सर्वा म्नाय कला कलाप कलितं कौतूहलो द्योतितं चन्द्रोपेन्द्र महेन्द्र शम्भु वरुणा ब्रह्मादिभिः सेवितम्। ध्यातं देवगणैः परं मुनिगणै र्मोक्षार्थिभिः सर्वदा वन्दे पात्रमहं तृतीय मधुना स्वात्माव बोधक्षमम् शिवतत्वं शोधयामि स्वाहा॥३॥ ॐ मद्यं मीनरसावहं हरिहर ब्रह्मादिभिः पूरितं मुद्रामैथुन धर्म कर्म निरतं क्षाराम्लतिक्ताश्रितम्। आचार्यार्चितमष्ट भैरवकला न्यासेन संछादितं पायात्पञ्चमकार तत्व निलयं पात्रं चतुर्थं नमः प्रकृति तत्वं शोधयामि स्वाहा॥४॥ ॐ

आधारे भुजगाधि राजवलये पात्रं मही मण्डलं मद्यं सप्त समुद्र वारिपिशितं चाष्टौ च दिग्दन्तिनः। सोहं भैरवमर्चयत्प्रतिदिनं तारागणै रक्षतैरादित्य प्रमुखैः सुरासुरगणैः आज्ञा करैः किंकरैः पुरुषस्तत्वं शोधयामि स्वाहा ॥५॥ ॐ छत्रं चामर भद्रपीठ परमानन्दो दयं दायकं वाजीदन्त मनोहरं सुखकरं सायुज्य साम्राज्यदम्। नानाव्याधि भवान्धकारशमनं जन्मान्तरध्वासनं श्रीमद् भैरवी प्रियतरं पात्रं च षष्ठं नमः मनस्तत्वं शोधयामि स्वाहा ॥६॥ ॐ जाग्रत्स्वप्नसुषुप्ति बोध पवनं चैतन्य साक्षी प्रदं विद्युद्-भास्कर बह्नि जिष्णु धनुषां ज्योतिः कलाव्यापितम्। वामापिङ्गल मध्यगा त्रिवलया सत्कुण्डली चोर्ध्वगा पात्रं सप्तम पूरणेन तरुणानन्द प्रदं पातुमाम् बुद्धितत्वं शोधयामि स्वाहा ॥७॥ ॐ खड्गं पादुक मंजुकं सुतिलकं कंठेहि सारस्वतं शत्रोर्वाग्बल शौर्य कार्य हरणं देह स्थिते कारणम्। वाञ्छासिद्धिकरं मनस्थितिकरं वश्यं जगद्योषितां पात्रं चाष्टममष्ट सिद्धिकरणां प्रौढ़ः प्रतापं भजे अहङ्कारतत्वं शोधयामि स्वाहा ॥८॥ ॐ सर्वानन्दकरं सदाशिव-पदं सवार्थसम्पत्प्रदं साम्राज्यार्थ करं समस्तसुखदं चाज्ञानविध्वंसनम्। आयुः कान्तियशोविवर्धनकरं संसारमोहच्छिदं पात्रं लक्ष गुणाकरं च नवमं सर्वार्थ सिद्धिप्रदम् सर्वतत्वं शोधयामि स्वाहा ॥९॥ आत्मानं कृतकृत्यं ज्ञात्वा यथा सुखं बिहरेदिति शिवम्। इत्येष पटलोदेवी नित्यपूजा प्रदर्शकः। गुह्याद्गुह्यतरो नित्यं गोपनीयं प्रयत्नतः। इति श्रीभुवनेश्वरी रहस्ये नित्य पूजपटलः षष्ठः ॥६॥

अथ सप्तमः पटलः

—:o:—

श्री देव्युवाच—

भगवन्परमेशान सर्वागमविशारद ।
कवचं भुवनेश्वर्याः कथयस्व महेश्वर ॥

श्री भैरवउवाच—

शृणुदेविमहेशानि कवचं सर्वकामदम् ।
त्रैलोक्य मोहनं नाम सर्वेप्सित फल प्रदम् ॥२॥
यस्य स्मरण मात्रेण ब्रह्मासंसार सागरे ।
जनार्दनोऽपि देवेशि त्रैलोक्य विजयीभवेत् ॥३॥
धनाधिपः कुबेरोऽपि देवेशीऽपि शचीपतिः ।
पठनात्द्धारणात्सत्यं यतः सर्वे दिगीश्वराः ॥४॥
सर्वैश्वर्य युताः शान्ताः सर्वसिद्धि मवाप्नुयुः ।
यस्य प्रसादादी शोऽपि भैरवानां सुरेश्वरि ॥५॥
त्रैलोक्य प्रथिताख्योहं विद्धि तत्कवचं शिवे ।
क्रोधाधिपो महावीर्यौ देवेशो भीम रूप धृक् ॥६॥
न दद्यात्परशिष्येभ्यो दद्याच्छिष्येभ्य एवच ।
अभक्तेभ्योऽपि पुत्रेभ्यो दत्वा नरक माप्नुयात् ॥७॥
त्रैलोक्य मोहनस्यास्य कवचस्य ऋषिः शिवः ।
छन्दो विराट देवता च कीर्तिताभुवनेश्वरी ॥८॥
चतुर्वर्गेषु विद्यायां विजये परकीर्तिताः ।

अस्य श्री त्रैलोक्य मोहन कवचस्य सदाशिव ऋषिः विराट् छन्दः श्रीभुवनेश्वरी देवता चतुर्वर्ग विद्यायां लक्ष्मी भोग मोक्ष-फल प्राप्यर्थं यन्त्रोद्धारेण कवच पाठे विनियोगः। ॐ ह्रीं क्लीं मेशिरः पातु श्रीं फट् पातु ललाटकं सिद्धपञ्चाक्षरी पायानेत्रे मे-भुवनेश्वरी ॥१॥ श्रीं क्लीं ह्रीं मे श्रुतिः पातु नमः पातुश्च नासिकाम्। देवो षडक्षरीपातु वदनं मुण्ड भूषणा ॥२॥ ॐ ह्रीं श्रीं ऐं गलं पातु जिह्वा पायान्महेश्वरी। ऐं स्कन्धौ पातुमेदेवी महात्रि भुवनेश्वरी ॥३॥ ह्रूं घंटा मे सदा पातु देव्ये काक्षर रूपिणी। ऐं ह्रीं श्रीं हूंतु फट् पाया दीश्वरी मे भुजद्वयम् ॥४॥ ॐ ह्रीं श्रीं क्लीं ऐं फट् पायाद्भुवनेशी स्तनद्वयम्। ह्रां ह्रीं ऐं फट् महामायो देवी च हृदयं मम ॥५॥ ऐं ह्रीं श्रीं हूं तु फट् पायात्पार्श्वौ कामस्वरूपिणी। ॐ ह्रीं क्लीं ऐं नमः पायात्कुक्षि महाषडक्षरी ॥६॥ ऐं सोः ऐं ऐं क्लीं फट् स्वाहा कटिदेशे सदावतु। अष्टाक्षरीं महाविद्या देवेशी भुवने-श्वरी ॥७॥ ॐ ह्रीं ह्रौं ऐं श्रीं ह्रीं फट् पायान्के गुह्यस्थलम् मम। षडक्षरी महाविद्या साक्षाद्ब्रह्म स्वरूपिणो ॥८॥ ऐं ह्रां ह्रौं ह्रं नमोदैव्येदेवी सर्वं पदं ततः। ॐ दुस्तरं पदं तारय पदं तारय प्रणवद्वयम् ॥९॥ स्वाहा इति महाविद्या जानुनि मे सदावतु। ऐं सोः ॐ ऐं क्लीं फट् स्वाहा जंघेव्याद्भुवनेश्वरी ॥१०॥ ॐ ह्रीं श्रीं क्लीं ऐं फट् पायात्पादौ मे भुवनोश्वरी। ॐ ॐ ह्रीं ह्रीं श्रीं श्रीं क्लीं क्लीं ऐं ऐं सौः सोः वद वद वाग्वादिनीति च बीजद्वयं द्वयं देवि विद्यायां विश्वव्यापिनी ॥११॥ सौः सौः सौः ऐं ऐं ऐं क्लीं क्लीं क्लीं श्रीं श्रीं श्रीं ह्रीं ह्रीं ह्रीं ॐ ॐ ॐ चतुर्दशात्मिका विद्या पाया

कवचे नमे ॥१२॥ सकलं सर्वभीतिभ्यः शरीरं भुवनेश्वरी। ॐ ह्रीं श्रीं इन्द्र दिग्भागे पायान्मे चापराजिता ॥१३॥ क्लीं ऐं ह्रीं विजया पायादिन्दु पुरदग्निदिक् स्थले। ॐ श्रीं सोः क्लीं जया पातु याम्यां मां कवचान्वितम् ॥१४॥ ह्रीं ह्रीं ऐं सोः ह्सौंः पायान्नैऋतिर्मां परात्मिका। ॐ श्रीं श्रीं ह्रीं सदा पायात्पश्चिमे ब्रह्मरूपिणी ॥१५॥ ॐ ह्रां सोः मां भयाद्रक्षेद्वायव्यां मंत्र रूपिणी। ऐं क्लीं श्रीं सौंः सदाऽव्यान्मां कौवेर्यां नग नन्दिनी ॥१६॥ ॐ ह्रीं श्रीं क्लीं महादेवी ऐशान्यां पातु नित्यशः। ॐ ह्रीं मन्त्रमयी विद्या पायादूर्ध्वं सुरेश्वरी ॥१७॥ ॐ ह्रीं श्रीं क्लीं ऐं मां पायादधस्था भुवनेश्वरी। एवं दशदिशोरक्षेत्सर्वमन्त्रमयी शिवा ॥१८॥ प्रभातेपातु चामुण्डा श्रीं क्लीं ऐं सोः स्वरूपिणी। मध्याह्ने ऽव्यातुमामम्बा श्रीं ह्रीं क्लीं ऐं सोः स्वरूपिणी ॥१९॥ सायंपाया दुमादेवी ऐं ह्रां क्लीं सोः स्वरूपिणी। निशादौ पातु रुद्राणी ॐ क्लीं क्रीं स्वरूपिणी ॥२०॥ निशीथे पातु ब्रह्माणी क्रीं हूं ह्रीं ह्रीं स्वरूपिणी। निशान्ते वैष्णवी पायादों मैं ह्रीं क्लीं स्वरूपिणी ॥२१॥ सर्व कालं च मां पायादों ह्रीं श्रीं भुवनेश्वरी। एषा विद्या मया गुप्ता तन्त्रेभ्यश्चापि साम्प्रतम् ॥२२॥ देवेशि कथिता तुभ्यं कवचेच्छा त्वयि प्रिये। इति ते कथितं देवि गुह्याद्गुह्य तरं परम् ॥२३॥ त्रैलोक्य मोहनं नाम कवचं मन्त्र विग्रहम्। ब्रह्म विद्यामयं भद्रे केवलं ब्रह्मरूपिणम् ॥२४॥ मन्त्र विद्यामयं चैव कवचं मन्मुखोदितम्। गुरुमभ्यर्च्य विधिवत्कवचं धारयेद्यदि ॥२५॥ साधको वैयथाध्यानं तत्क्षणाद्भैरवो भवेत्। सर्वपाप विनिर्मुक्तः कुलकोटि समुद्धरेत् ॥२६॥

गुरुः स्यात्सर्वविद्यासु ह्यधिकारो जपादिषु। शतमष्टोत्तरं चास्य पुरश्चर्या विधिः स्मृतः ॥२७॥ शतमष्टोत्तरं जप्त्वा तावद्धोमादिकं तथा। त्रैलोक्ये विचरेद्धीरो गणनाथो यथा स्वयम् ॥२८॥ गद्य-पद्यमयी वाणी भवेद्गङ्गा प्रवाहवत्। पुष्पाञ्जल्याष्टकं दत्वा मूले-नैव पठेत्सकृत् ॥२९॥

श्री देव्युवाच—

भगवन्करुणाम्भोधे कीदृशं मन्त्रमुत्तमम् ।
मूलकं भुवनेश्वर्याः कृपया वक्तुमर्हसि ॥३०॥

ईश्वर उवाच—

शृणु देविप्रवक्ष्येह मुद्धारं मन्त्र विग्रहम् ।
देवेशि भुवनेश्वर्या गोप्याद्गोप्यतमं कुरु ॥३१॥
प्रणवं सकला लक्ष्मीः कामं वाग्भवमेवच ।
शरश्च भुवनेश्वर्यै मध्येऽन्तश्च नमः इतिः ॥३२॥
प्रोक्तोऽयं भुवनेश्वर्या मन्त्र त्रयोदशाक्षरः। इत्युद्धारः।
प्रकाशम्—ॐ ह्रीं श्रीं क्लीं ऐं सौः भुवनेश्वर्यै नमः। इति मूलम्।

अनेन मन्त्रेण नरेश्वरो यो
ध्याये द्धृदब्जे भुवनेश्वरीं ताम् ।
स याति भूपेश्वरतां च भूमौ
मृतोभवेत्सन्निदिवे सुरेशः ॥३३॥

भूर्जे विलिख्य गुटिकां स्वर्णस्थां धारयेद्यदि ।
पुरुषो दक्षिणे बाहौ योषिद्वाम करे तथा ॥३४॥

सर्व सिद्धि युतो भूत्वा विचरेद्भैरवो यथा ।
तद्गात्रं प्राप्य शस्त्राणि ब्रह्मास्त्रादीनि पार्वती ॥३५॥
अल्पानि कुसुमानीव भवन्ति सुखदानि च ।
तस्य गेहे चिरं लक्ष्मीः वाणी च निवसे ध्रुवम् ॥३६॥
इदं कवचम ज्ञात्वा सयन्त्रं मन्त्र विग्रहम् ।
यो भजेद् धमोमर्त्यो देवेशि भुवनेश्वरीम् ॥३७॥
अल्पायुर्निर्बलो मूर्खो भवत्येत्र न संशयः ।

श्री देव्युवाच—

कीदृशं भुवनेश्वर्या यन्त्र मन्त्रमयं महत् ॥३८॥
यं दृष्ट्वा लभते मुक्ति पूजित्वा मानवेश्वरः ।

भैरव उवाच—

ब्रवीमींयया तुभ्यं गोपनीयं प्रयत्नतः ॥३९॥
यस्य कस्य न दातव्यं दत्वा कुष्टी भवेच्छिवे ।
त्रिकोणं पूर्वमुद्धृत्य ह्यधस्थाद्वीरवन्दिते ॥४०॥
ऊर्ध्वं च तादृशं कुर्यात्त्रिकोणं च पुनः क्षिपेत् ।
अधस्तात्कोण कुहराद्ूर्ध्वं कोणे समाक्षिपेत् ॥४१॥
उत्थाप्योर्ध्वं त्रिकोणश्च यन्त्रमध्ये विनिक्षिपेत् ।
पुनस्त्रिकोण मध्येतु बिन्दु स्थानं समाचरेत् ॥४२॥
यन्त्रान्ते चतुरस्त्राभिः मयाभिः सहितं चरेत् ।
लता भिस्सहिता रेखाश्चतस्त्रस्त्रिः समाचरेत् ॥४३॥
बीजाक्षरान्वि भज्यैवं यन्त्रं प्रोक्तं मया तव ।
बिन्दोरोर्ध्वश्च प्रणवं तत् ऊर्ध्वं परा न्यसेत् ॥४४॥

तत ऊर्ध्वं च कमलां सव्ये च मदनं न्यसेत् ।
बामेऽपि चारणं प्रोक्तं पुनः सव्ये शरस्मृता ॥४५॥
बामेप्य चरमां वर्णं नान्यः पर्वतनन्दिनि ।
पर नाम्नो परं वर्णं पुनः वामेऽपि तादृशम् ॥४६॥
पुनर्नामाक्षरं सव्ये तथा बामेऽपि विन्यसेत् ।
बिन्दोरधस्थादपरं तदधस्तात्स्मृतं परम् ॥४७॥
अस्मिन्बीजाक्षराण्येवं विभज्य भुवनेश्वरीम् ।
पूजयेत्साधको धीमान् धारयेत्साधकोत्तमः ॥४८॥
कवचं यन्त्र संयुक्तं सर्वमन्त्र मयं महत् ।
सम्पूज्य कवचं यन्त्रं धृत्वापि साधकेश्वरः ॥४६॥
त्रैलोक्ये विचरेद्वीरो यथैवाहं तथैव सः ।
इदं रहस्य परमं भक्त्या तव मयोदितम् ॥५०॥
यस्य कस्य न वक्तव्यं सत्यं जानीहि सुव्रते ।
कर्मणा मनसा वाचा सत्यं सत्यं सुरेश्वरि ॥५१॥
रहस्यं भुवनेश्वर्या न देयं यस्य कस्यचित् ।
दद्याच्छिष्याय शान्ताय गुरु भक्ति पराय च ॥५२॥
लोभ मोह विहीनाय देवी भक्तियुताय च ।
सत्यं सत्यं पुनः सत्यं सत्यं जानीहि पार्वति ॥५३॥
इत्येषः पटलो देवि गोपनीयं महेश्वरि ।
कवचोद्धारको नाम साधकेष्टफलः प्रदः ॥५४॥

इति श्री भुवनेश्वरी रहस्ये कवच कथनं सप्तमः पटलः ॥७॥

अथ अष्टमः पटलः

—:०:—

भैरव उवाच—

देवि तुष्टोऽस्मि सेवा भिस्त्वद्रूपेण च भाषया ।
मनोभिलषितं किञ्चिद्वरं वरय सुव्रते ॥१॥

श्री देव्युवाच—

तुष्टोऽसि यदि मे देव वरयोग्यास्म्यहं यदि ।
वद मे भुवनेश्वर्या मन्त्र नामसहस्रकम् ॥२॥

भैरव उवाच—

तवभक्त्या ब्रवीम्यद्य देव्या नाम सहस्रकम् ।
मन्त्रगर्भं चतुर्वर्ग फलदं मन्त्रिणां कलौ ॥३॥
गोपनीयं सदा भक्त्या साधकैश्च सुसिद्धये ।
सर्व रोग प्रशमनं सर्वशत्रुभयाबहम् ॥४॥
सर्वोत्पात प्रशमनं सर्व दारिद्र्य नाशनम् ।
यशस्करं श्रीकरं च पुत्र पौत्र विवर्द्धनम् ॥५॥
देवेशि वेत्सि त्वद्भक्त्या गोपनीयं प्रयत्नतः ।
अस्य नाम्नां सहस्रस्य ऋषिः भैरवउच्यते ॥६॥
पङ्क्तिश्छन्दः समाख्याता देवता भुवनेश्वरी ॥६॥
ह्रीं बीजं श्रीं च शक्तिः स्यात् क्लीं कीलक मुदाहृतम् ।
मनोभिलाष सिद्ध्यर्थं विनियोगः प्रकीर्तितः ॥७॥

ॐ ह्रीं श्रीं जगदीशानि ह्रीं श्रीं बीजा जगत्प्रिया ।
ॐ श्रीं जयप्रदा ॐ ह्रीं जया ह्रीं जयवर्द्धिनी ॥८॥
ॐ ह्रीं श्रीं वां जगन्माता श्रीं क्लीं जगद्वर प्रदा ।
ॐ श्रीं जुं जटिनी ह्रीं क्लीं जयदा श्रीं जगंधरा ॥९॥
ॐ क्लीं ज्योतिष्मती ॐ जुं जननी श्रीं जरा तुरा ।
ॐ श्रीं जुं जगतीं ह्रीं श्रीं जप्या ॐ जगदाश्रया ॥१०॥
ॐ श्रीं जुं सः जगन्माता ॐ जुं जगत्क्षयं करी ।
ॐ श्रीं क्लीं जानकी स्वाहा श्रीं क्लीं ह्रीं जात रूपिणी ॥११॥
ॐ श्रीं क्लीं जाप्य फलदा ॐ जूं सः जनवल्लभा ।
ॐ श्रीं क्लीं जननीतिज्ञा ॐ श्रीं जन त्रयेष्टदा ॥१२॥
ॐ क्लीं कमलपत्राक्षी ॐ श्रीं क्लीं ह्रीं च कामिनी ।
ॐ गूं घोरा रवा ॐ श्रीं घोररूपा हसौं: गतिः ॥१३॥
ॐ गगणेश्वरी ॐ श्रीं शिवबामाङ्ग वासिनी ।
ॐ श्रीं शिवेष्टदा स्वाहा ॐ श्रीं शीतातपप्रिया ॥१४॥
ॐ श्रीं गूं गणमाता च ॐ श्रीं क्लीं गुणिरागिणी ।
ॐ श्रीं गणेश माता च ॐ श्रीं शङ्कर वल्लभा ॥१५॥
ॐ श्रीं क्लीं शीतलाङ्गी श्रीं शीतला ॐ शिवेश्वरी ।
ॐ श्रीं ग्लौं गजराज स्था ॐ श्रीं गीं गौतमी तथा ॥१६॥
ॐ घां घुरघुर नादा च ॐ गीं गीत प्रिया हसौं: ।
घरिणी गीं घटान्तस्था ॐ गीं गन्धर्व सेविता ॥१७॥
ॐ गौं श्रीं गोपति स्वाहा ॐ गीं गौं ॐ गणप्रिया ।
ॐ गीं गोष्ठी हसोः गोप्या ॐ गीं घर्मां शुलोचना ॥१८॥

ॐ श्रीं गंत्री ह्सोः घंटां ॐ घं घंटा रवाकुला ।
ॐ घ्रों श्रीं घोररूपा च ॐ गों श्रीं गरुडी ह्सोः ॥१६॥
गणया गीं ह्सोः गुर्वी ॐ श्रीं घोरद्युतिस्तथा ।
ॐ श्रीं गीं गण गन्धर्वं सेविताङ्गी गरीयसी ॥२०॥
ॐ श्रीं गाथ ह्सोः गोप्त्री ॐ गीं गणक सेविता ।
ॐ श्रीं गुणमति स्वाहा श्रीं क्लीं गौरी ह्सौः गदा ॥२१॥
ॐ श्रीं गीं गौर रूपाच ॐ गीं गौरस्वरा तथा ।
ॐ श्रीं गीं क्लीं गदाहस्ता ॐ गीं गोंदा ह्सौः पयः ॥२२॥
ॐ श्रीं क्लीं गम्या रूपा च ॐ अगम्या ह्सौः वनम् ।
ॐ श्रीं गीं घोर वदना घोराकारा ह्सौंः पयः ॥२३॥
ॐ ह्रीं श्रीं क्लीं कोमलाङ्गी च ॐ क्रीं कालक्षयं करी ।
ॐ क्रीं कर्पट हस्ता च क्रीं हूं कादम्बरी ह्सोः ॥२४॥
क्रीं श्रीं कनकवर्णा च ॐ क्रीं कनक भूषणा ।
ॐ क्रीं काली ह्सोः कान्ता क्रीं हूं कारुण्य रूपिणी ॥२५॥
क्रीं श्रीं कूट प्रिया क्रीं हूं त्रिकूटा क्रीं कुलेश्वरी ।
ॐ क्रीं कम्बल वस्त्रा च क्रीं पीताम्बर सेविता ॥२६॥
क्रीं श्रीं कुल्या ह्सौः कीर्तिः क्रीं श्रीं क्लीं क्लेश हारिणी ।
ॐ क्रीं कूटालय क्रीं ह्रीं कूटकर्त्री ह्सोः कुटीः ॥२७॥
ॐ श्रीं क्लीं काम कमला क्लीं श्रीं कमला क्रीं च कौरवी ।
क्रीं श्रीं कुरुरवा ह्रीं श्रीं हाटकेश्वर पूजिता ॥२८॥
ॐ ह्रां रां रम्यरूपाच ॐ श्रीं क्रीं कांचनां गदा ।
ॐ क्रीं श्रीं कुण्डली क्रीं हूं काराबन्धन मोक्षदा ॥२६॥

ॐ क्रीं कुराह_सौः क्लौं ह्लूं ॐ क्रों कौरव मर्दिनी।
ॐ श्रीं कटु ह_सोः कुंटी ॐ श्रीं कुष्ठक्षयं करी ॥३०॥
ॐ श्रीं चकोरकी कान्ता क्रीं श्रीं कपालिनी परा।
ॐ श्रीं कालिका कामा ॐ श्रीं ह्रीं क्लीं कलंकिता ॥३१॥
क्रीं श्रीं क्लीं क्रीं कठोराङ्गी ॐ श्रीं कपट रूपिणी।
ॐ क्रीं कामवती क्रीं श्रीं कन्या क्रीं कालिका ह_सोः ॥३२॥
श्मशान कालिका श्रीं क्लीं ॐ क्रीं श्रीं कुटिलालका।
ॐ क्रीं श्रीं कुटिल भ्रुश्च क्रीं ह्रूं कुटिल रूपिणी ॥३३॥
ॐ क्रीं कमलहस्ता च क्रीं कुण्टीं ॐ क्रीं कौलिनी।
ॐ श्रीं क्लीं कंठमध्यस्था क्रीं क्लीं कान्ति स्वरूपिणी ॥३४॥
ॐ कार्तु स्वरूपाच ॐ क्रीं कात्यायनी ह_सौः।
कलावति ह_सौः काम्या क्रीं कलानिधीशेश्वरी ॥३५॥
ॐ क्रीं श्रीं सर्वमध्यस्था ॐ क्रीं सर्वेश्वरी पयः।
ॐ क्रीं ह्रूं चक्रमध्यस्था ॐ क्रीं श्रीं चक्ररूपिणी ॥३६॥
ॐ क्रीं ह्रूं चं चकोराक्षी ॐ चं चन्दन शीतला।
ॐ चं चर्माम्बरा ह्रूं क्रीं चारुहासा हसौः च्युता ॥३७॥
ॐ श्रीं चौरप्रिया ह्रूं च चार्वङ्गी श्रीं चला चला।
ॐ श्रीं ह्रूं कामराज्येष्टा कुलिनी क्रीं ह_सोः कुहु ॥३८॥
ॐ क्रीं क्रिया क्रीं कुलाचारा क्रीं क्रीं कमल वासिनी।
ॐ क्रीं हेलाः हसौः लीलाः ॐ क्रीं काल विलासिनी ॥३९॥
ॐ क्रीं कालप्रिया ह्रूं क्रीं कालरात्री हसौः बला।
ॐ क्रीं श्रीं शशिमध्यस्था क्रीं श्रीं शश्पर्श लोचना ॥४०॥

ॐ क्रीं शीतांशु मुकुटा क्रीं श्रीं सर्ववर प्रदा।
ॐ श्रीं श्यामाम्बरा स्वाहा ॐ श्रीं श्यामल रूपिणी ॥४१॥
ॐ श्रीं क्रीं श्रीं सती स्वाहा ॐ क्रीं श्रीधर सेविता।
ॐ श्रीं रूक्षा हसौः रंभा ॐ क्रीं रसवर्ति पथा ॥४२॥
कुण्डगोल प्रियकरी ह्रीं श्रीं ॐ क्लीं कुरूपिणी।
ॐ श्रीं सर्वाहसौः तृप्तिः ॐ श्रीं तारा हसौः त्रया ॥४३॥
ॐ श्रीं तारुण्य रूपा च ॐ क्रीं त्रिनयना पयः।
ॐ श्रीं ताम्बूल रक्तास्या ॐ क्रीं उग्र प्रभा तथा ॥४४॥
ॐ श्रीं उग्रेश्वरी स्वाहा ॐ श्रीं उग्र रवाकुला।
ॐ क्रीं च सर्व भूषाढ्या ॐ श्रीं चम्पकमालिनी ॥४५॥
ॐ श्रीं चम्पक वल्ली च ॐ ह्रीं श्रीं च च्युतालया।
ॐ श्रीं द्युतिमति स्वाहा ॐ श्रीं देव प्रसूः पयः ॥४६॥
ॐ श्रीं दैत्यारि पूजा च ॐ क्रीं दैत्य विमर्दिनी।
ॐ श्रीं द्युमणि नेत्रा च ॐ श्रीं दंभ विवर्जता ॥४७॥
ॐ दारिद्र्य राशिघ्नी ॐ श्रीं दामोदर प्रिया।
ॐ क्लीं दर्पापहा स्वाहा ॐ क्रीं कन्दर्प लालसा ॥४८॥
ॐ क्रीं करीरवृक्षस्था ॐ क्रीं हूंकारि गामिनी।
ॐ क्रीं शुक्रात्मिका स्वाहा ॐ क्रीं शुक्रकरा तथा ॥४९॥
ॐ श्रीं शुक्र श्रुतिः श्रीं क्लीं श्रीं ह्रीं शुक्रकवित्वदा।
ॐ क्रीं शुक्रप्रसू स्वाहा ॐ श्रीं क्रीं शवगामिनी ॥५०॥
ॐ श्रीं रक्ताम्बरा स्वाहा ॐ क्रीं पीताम्बरार्चिता।
ॐ श्रीं क्रीं स्मित संयुक्ता ॐ श्रीं क्रीं सौः स्मरातुरा ॥५१॥

ॐ श्रीं क्रीं हूं च स्मेरास्या ॐ श्रीं स्मर विवर्द्धिनी ।
ॐ श्रीं सर्पाकुला स्वाहा ॐ श्रीं सर्वोपवेशिनी ॥५२॥
ॐ क्रीं सोः सर्पकन्या च ॐ क्रीं सर्पासन प्रिया ।
सौः सौः क्लीं सर्पकुटिला ॐ श्रीं सुरासुरार्चिता ॥५३॥
ॐ श्रीं सुरारिमथिनी ॐ श्रीं सुरिजन प्रिया ।
ऐं सौः सुर्येन्दुनयना ऐं क्लीं सूर्यायुत प्रभा ॥५४॥
श्रीं क्लीं सुरसेव्या च ॐ श्रीं सर्वेश्वरी तथा ।
ॐ श्रीं क्षेमकरी स्वाहा ॐ क्रीं हूं भद्र कालिका ॥५५॥
ॐ श्रीं श्यामा ह्सौंः स्वाहा ॐ श्रीं ह्रौं शर्वरी स्वाहा ।
ॐ श्रीं क्लीं सर्वरी तथा ॐ श्रीं क्लीं शान्त रूपिणी ॥५६॥
ॐ क्रीं श्रीं थीं धरे शानि ॐ श्रीं क्लीं शाकिनी तथा ।
ॐ क्लीं शितिर्हसौः शारी ॐ श्रीं क्लीं शारदा तथा ॥५७॥
ॐ श्रीं ह्रीं शारिका स्वाहा ॐ श्रीं शाकंभरी तथा ।
ॐ श्रीं क्लीं शिव रूपा च ॐ श्रीं क्लीं काम चारिणी ॥५८॥
ॐ यं यज्ञेश्वरी स्वाहा ॐ श्रीं यज्ञ प्रिया सदा ।
ऐं क्लीं यं यज्ञ रूपा च ॐ श्रीं यं यज्ञदक्षिणा ॥५९॥
ॐ श्रीं यज्ञार्चिता स्वाहा ॐ यं याज्ञक पूजिता ।
श्रीं ह्रीं यं यज्ञमान स्त्री ॐ श्रीं यज्वा ह्सौः वधू ॥६०॥
ॐ श्रीं वां बटुक पूजिता ॐ श्रीं वरूथिनी स्वाहा ।
ॐ क्रीं वार्ता हसौस्तथा ॥६१॥
ॐ श्रीं क्लीं ऐं च वाराही ॐ श्रीं क्लीं वरवर्णिनी ।
ॐ ऐं सौः वार्तदा स्वाहा ॐ श्रीं वराङ्गना तथा ॥६२॥

ॐ श्रीं वैकुण्ठ पूजा च वां श्रीं ऐं क्लीं च वैष्णवी ।
ॐ श्रीं ब्रां ब्राह्मणी स्वाहा ॐ क्रीं ब्राह्मण पूजिता ॥६३॥
ॐ श्रीं ऐं क्लीं च इन्द्राणी ॐ ॐ क्लीं इन्द्र पूजिताः ।
ॐ श्रीं क्लीं इन्द्रि ऐं स्वाहा ॐ श्रीं इन्दुशेखरा ॥६४॥
ॐ ऐं इन्द्र समानाभा ॐ ऐं क्लीं इन्द्र वल्लभा ।
ॐ श्रीं इडाहसौः नाभि ॐ श्रीं ईश्वर पूजिता ॥६५॥
ब्रौ ब्राह्मो क्लीं च रुद्राणी ॐ ऐं द्री श्री रमा तथा ।
ऐं क्लीं स्थाणु प्रिया स्वाहा ॐ गीं गदक्षय करी ॥६६॥
ॐ गीं गीं श्रीं गुरुस्था च ऐं क्लीं गुद विवर्द्धिनी ।
ॐ श्रीं क्रीं क्रुं कुलीरस्था ॐ क्रीं श्रीं कूर्मपृष्ठगा ॥६७॥
ॐ श्रीं श्रं तोतला स्वाहा ॐ त्रौं त्रिभुवनार्चिता ।
ॐ प्रीं प्रीति हसौः प्रातां प्रीं प्रभा प्रीं पुरेश्वरी ॥६८॥
ॐ प्रीं पर्वत पुत्री च ॐ प्रीं पर्वत वासिनी ।
ॐ श्रीं प्रीति प्रदा स्वाहा ॐ ऐं सत्त्वगुणाश्रिता ॥६९॥
ॐ क्लीं सत्य प्रिया स्वाहा ऐं सौः क्लीं सत्य सङ्करा ।
ॐ श्रीं सनातना स्वाहा ॐ श्रीं सागर शायिनी ॥७०॥
ॐ क्लीं चं चन्द्रिका ऐं सौः चन्द्रमण्डल मध्यगा ।
ॐ श्रीं चारु प्रभा स्वाहा ॐ श्रीं प्रैं प्रेत शायिनी ॥७१॥
ॐ श्रीं श्रीं मथुरा ऐं क्रौं काशी श्रीं श्रीं मनोरमा ।
ॐ श्रीं मन्त्रमयी स्वाहा ॐ चं चन्द्रक शीतला ॥७२॥
ॐ श्रीं क्लीं शाकरी स्वाहा ॐ श्रीं सर्वाङ्ग वासिनी ।
ॐ श्रीं सर्व प्रिया स्वाहा ॐ श्रीं क्लीं सत्यभामिनी ॥७३॥

ॐ क्लीं सत्यात्मिका स्वाहा ॐ क्लीं ऐं सौः च सात्त्विकी ।
ॐ श्रीं रां राजसी स्वाहा ॐ क्रों रंभोयमा तथा ॥७४॥
ॐ श्रीं राघव सेव्या च ॐ श्री रावण घातिनी ।
निशुम्भ हन्त्री ह्रीं श्रीं क्लीं ॐ क्रों शुम्भ मदा पहा ॥७५॥
ॐ श्रीं रक्तप्रिया हरा रक्त बीज क्षयं करी ।
ॐ श्रीं माहिष पृष्ठस्था ॐ श्रीं महिष घातिनी ॥७६॥
ॐ श्रीं श्रीं माहिषे स्वाहा ॐ श्रीं श्रीं मानवेष्टदा ।
ॐ श्रीं मति प्रदा स्वाहा ॐ श्रीं मनुमयी तथा ॥७७॥
ॐ श्रीं मनोहराङ्गी च ॐ श्रीं माधव सेविता ।
ॐ श्रीं मागधस्तुत्या च ॐ श्रीं बन्दीस्तुता सदा ॥७८॥
ॐ श्रीं मान प्रदा स्वाहा ॐ श्रीं मान्या हसौः मतिः ।
ॐ श्रीं श्रीं मानिनी स्वाहा ॐ श्रीं मानक्षयं करी ॥७९॥
ॐ श्रीं मार्जार गम्या च ॐ श्रीं मृगी लोचना ।
ॐ मराळ मतिः श्रीं श्रीं मकुरा प्रीं च पूतना ॥८०॥
ॐ श्रीं परापरा ॐ श्रीं परिवार समुद्भवा ।
ॐ श्रीं पद्मवरा ऐं सौः पद्मोभवक्षयं करी ॥८१॥
ॐ प्रीं पद्मा हसौः पुराय ॐ प्रीं पुरायाङ्गनातथा ।
ॐ श्रीं ययो दशदशी ॐ प्रीं परावतेश्वरी ॥८२॥
ॐ पयोधर नम्राङ्गी ॐ ध्रों धाराधर प्रिया ।
ॐ धृति ऐं दया स्वाहा ॐ श्रीं क्रों श्री दयावती ॥८३॥
ॐ श्रीं द्रुत गतिः स्वाहा ॐ द्रों द्रं वन घातिनी ।
ॐ चं चर्माम्बरेशानी ॐ चं चं डाल रूपिणी ॥८४॥

ॐ चामुण्डाह्सौः चण्डी ॐ चं क्रीं चण्डिका पयः ।
ॐ क्रीं चण्ड प्रभा स्वाहा ॐ चं क्रीं चारु हासिनो ॥८५॥
ॐ क्रीं श्रीं अच्युतेष्टा ह्रीं चण्ड मुण्ड क्षयं करी ।
ॐ त्रौं श्रीं त्रितये स्वाहा ॐ श्रीं त्रिपुरभैरवी ॥८६॥
ॐ ऐं सौः त्रिपुरानन्दा ॐ ऐं त्रिपुर सूदिनी ।
ऐं क्लीं सौः त्रिपुराध्यक्षा ऐं त्रौं श्रीं त्रिपुराश्रया ॥८७॥
ॐ श्रीं त्रिनयने स्वाहा ॐ श्रीं तारा वरकुला ।
ॐ श्रीं तुंबुरुहस्ता च ॐ श्रीं मन्द भाषिणी ॥८८॥
ॐ श्रीं महेश्वरी स्वाहा ॐ श्रीं मोदक भक्षिणी ।
ॐ श्रीं मन्दोदरी स्वाहा ॐ श्रीं श्रीं मधुरभाषिणी ॥८६॥
ॐ म्रीं श्रीं मधुरालापा ॐ श्रीं मधुरभाषिणी ।
ॐ श्रीं मातामही स्वाहा ॐ मान्या म्रीं मदालसा ॥६०॥
ॐ म्रीं मदोद्धता स्वाहा ॐ म्रीं मन्दिर वासिनी ।
ॐ श्रीं क्लीं षोड़शारथा ॐ म्री द्वादश रूपिणी ॥६१॥
ॐ श्रीं द्वादश पत्रस्था ॐ श्रीं अं अष्टकोणगा ।
म्रीं मातंगी हसौः श्रीं क्लीं मत्तमातङ्ग गामिनी ॥६२॥
ॐ म्रीं मालापहा स्वाहा ॐ म्रीं माताहसौः सुधा ।
ॐ श्रीं सुधाकला स्वाहा ॐ म्रीं मांसिनी स्वाहा
ॐ म्रीं मालाकरी तथा ।
ॐ म्रीं माध्वी रसापूर्णा ॐ श्रीं सूर्या हसौंसती ॥६४॥
ॐ ऐं सौः क्लीं सत्यरूपा ॐ श्रीं दीक्षा हसौः दरी ।
ॐ द्रीं दातृप्रिया ह्रीं श्रीं दक्षयज्ञ विलासिनी ॥६५॥

ॐ दातृ प्रसू स्वाहा ॐ श्रीं दाता हसौः पयः।
ॐ श्रीं ऐं सौः च सुमुखी ॐ ऐं सौः सत्य वारुणी।
ॐ श्रीं साडम्बरा स्वाहा ॐ श्रीं ऐं सौः सदागतिः।
ॐ श्रीं सीताहसौः सत्या ॐ ऐं सन्तान शायिनी ॥९६॥
ॐ ऐं सौः सर्व दृष्टिश्च ॐ क्रीं कल्पान्त कारिणी।
ॐ श्रीं चन्द्रकलाधरा ॐ ऐं श्रों पशुशालिनी ॥९७॥
ॐ श्रीं शिशुप्रिया ऐं सौः शिशूत्संग निवेशिता।
श्रीं ऐं सौः तारिणी स्वाहा ॐ ऐं क्लीं तामसी तथा ॥९८॥
ॐ म्रों मोहान्धकार घ्नी ॐ म्रों मत्तमनास्तथा।
ॐ म्रीं श्रीं माननीया च ॐ प्रीं पूजा फलप्रदा ॥९९॥
ॐ श्रीं श्रीं श्रीफला स्वाहा ॐ श्रीं क्लीं सत्यरूपिणी।
ॐ श्रीं नारायणी स्वाहा ॐ श्रीं क्लीं नूपुराकिला ॥१००॥
ॐ म्रीं श्रीं नारसिंही च ॐ म्रीं नारायण प्रिया।
ॐ म्रीं हंसगतिः स्वाहा ॐ श्रों हंसो हसौः पयः ॥१०१॥
ॐ श्रीं क्रीं करवालेष्टा ॐ क्रों कोटरवासिनी।
